**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 6
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# शिवकथामृतमहाकाव्यस्य एकमध्ययनम् चैतन्यदर्शनदृष्ट्या

डॉ. प्रदीप कुमार बाग्
उपाचार्यः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरूपतिः

**Article Info**
**Publication Issue :**
November-December-2023
Volume 6, Issue 6
**Page Number :** 290-293

**Article History**
Received : 02 Nov 2023
Published : 21 Nov 2023

**सारांशः** – शिवकथामृतमहाकाव्यस्य रचयिता भवति छज्जुरामशास्त्रीमहोदयः। काव्यमिदं अष्टादशसर्गात्मकं वर्त्तते। काव्येऽस्मिन् शिवपुराणकथा अतिविशाला सर्वोत्कृष्टा च वर्त्तते। महाकाव्येस्मिन् शिवशक्तिवर्णनं वर्त्तते। यत दार्शनिकदृष्ट्या अत्यान्तम् उपयोगिकाव्यं भवति। शैवदर्शनस्य चैतन्यदर्शनस्य च उपस्थापितं पत्रेऽस्मिन् मया। तत्किञ्चित् अहं शोधलेखे अत्र उपस्थापनं कृतवान्।

**मुख्यशव्दाः** – मायापुरी, काशीपुरी, परंव्रह्म, परमेश्वरः, प्रकृतिपुरूषः, व्रह्मज्ञान, चैतन्यमहाप्रभुः।

महाप्रभोः चैतन्य अचिन्त्यभेदाभेददर्शनस्य प्रणेता आसीत्। तस्मिन् दर्शने सः दयकृष्णस्य अचिन्त्यतत्त्वम् अभेदत्वं प्रतिपादितवान् अस्ति। अपि च सः कथयति – अयं च कृष्णः यस्मिन् स्थाने, यस्मिन् क्षेत्रे,यस्मिन् तीर्थक्षेत्रे,यस्यां पुर्यां वासं करोति तत्क्षेत्रं पुतं पवित्रं पावनत्वं भवति। तत्क्षेत्रेव श्रीकृष्णः नित्यलीलां कुरुते। तेषु एव क्षेत्रेषु नदीयाक्षेत्रे मायापुरी अत्यन्तं पूता भवति। एतस्मिन् विषये विष्णुपुराणे उच्यते:–

**अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका।**
**पुरी द्वारावती चैव सप्तैताः मोक्षदायका।।**[i]**(वि.पु-1)**

एतस्यां मायापूर्यां कश्चिच्चेतनासम्पन्नचैतन्यः समुत्पन्नः समभूत्। सोऽपि चैतन्यः कथयति सप्तपुरीणां पूरीषु वा यदि भ्रमणं क्रियेत तर्हि पापस्य नाशः पदे पदे सञ्जायते तथा देवानामाशीः नित्यं परिपतति।
तथैव “शिवकथामृतमहकाव्ये” कवि छज्जुरामशास्त्री– विद्यासागरमहोदयः अपि काशीपूर्याः वर्णना प्रसङ्गे कथयति – एतासां पूर्यां ये वासं कुर्वन्तिते स्वर्गं प्राप्नुवन्ति मोक्षं च विन्दन्ति। ते नराः धन्यधन्याः अपि भवन्ति। ते नराः पण्डिताः भवितुमर्हन्ति। किमर्थमित्युक्ते ते तु नित्यं तत्र विद्यमानानां मन्दिराणां दर्शनं कुर्वन्ति। तथा पाठशालायामध्ययनम् अध्यापनंकुर्वन्ति कारयन्ति च।एतस्मात् कारणात् सा च काशीपुरी मायापुरी सदृशी पवित्रा विद्वज्जनवन्दिता चभवति।

**यत्र स्वर्गस्तु किंवस्तु मोक्षः कायस्य मोक्षाणाद्-**
**धन्यास्ति सा पुरी काशी धुरी सप्त पुरिषु या।।**
**पदे पदे मन्दिराणि पाठशालाः पदे पदे।**
**पदे पदे च विद्वांसः काश्यामन्यत्र दुर्लभम्।।**[ii]**(शि.क.म.-1.6/7)**

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

महाप्रभुचैतन्य: स्वस्य "चैतन्यलीलामृतकाव्ये" कथयति भगवत: कृष्णस्य रूपद्वयं भवति तत् च साकाररूपं निराकारं रूपम् च। यत्र भगवत: आकृति: विद्यते तच्च रूपं साकाररूपमिति कथ्यते।यत्र भगवत: रूपाकृति: नैव दृश्यते तच्च रूपं निराकाररूपमिति कथ्यते। साकाररूपे विकृतादय: विकारा: भवन्ति। परन्तु निराकाररूपे विकृतादयरूपाणि नैव दृश्यन्ते। परन्तु भगवान् कृष्ण: न तु साकार: अपि तु स: परंब्रह्मस्वरूप:, निर्विकार:, निराकार:, निरञ्जन:, निर्लेप:, श्रुतिस्मृत्यादिषु परिकथित:।अत: स एव साक्षात् पुरुषोत्तमस्वरूप: भवति।

यथा चैतन्यमहाप्रभु: "चैतन्यचरिताऽमृते" एतद्विषयं वर्णयामास। तथैव "शिवकथामृतमहाकाव्ये" छज्जुरामशास्त्रीमहोदय: अपि समानविषयं समभिवर्णयति। स: च कथयति – परमेश्वरस्य शिवस्य द्वे रूपे स्त:। एकं निर्विकाररूपम् . अपरं विकाररूपम् । विकाररूपं यद्भवति स: च सगुणब्रह्म भवति। निर्विकाररूपं यद्भवति तच्च निर्गुणब्रह्म भवति।परन्तु शिव: न वा विकृत: न वा विकारशून्य: अपि तु निर्विकार:, श्रुतिस्वरूप:, शिवस्वरूप:, मङ्गलरूप: भवति। तथा सर्वेषां भक्तानां च मङ्गलञ्च करोति। अस्मादुच्यते –

**परमेश्वररूपे द्वे निर्विकारं विकारायुक्।**

**विकारयुक्त: सगुण: शिव: श्रुतिषु कीर्तित:।।**[iii]**(शि.क.म.1.8)**

चैतन्यदर्शने शक्ति: अपि वर्णिता। तत्र शक्ति: पदेन चिच्छक्ते: ग्रहणम्। इत्युक्ते आह्लादिनीशक्ते: ग्रहणं भवति। इयं च आह्लादिनीशक्ति: राधायां विद्यमाना आसीत् इति ब्रह्मवैवर्तपुराणे राधाया: प्रसङ्गे अयं च विषय: कथित अस्ति। अत: शक्ति: इत्युक्ते राधा पक्षान्तरे शक्ति: पदेन पृथिव्यां सर्वेषाम् मात्रृणां ग्रहणं भवति इति शङ्कराचार्य: आनन्दलहर्याम् उक्तवान्। शङ्कराचार्य: कथयति यथा:– प्रकृतिं विना पुरुष: निष्क्रिय:भवति, तथैव पुरुषं विना प्रकृति: निष्क्रिया भवति। तथैव स्त्रियं विना पुरुष: निष्क्रिय:। तद्वत् मातृशक्तिं विना जगच्छक्ति: निष्क्रिया।अस्मात् उच्यते:–**"शिव शक्त्या युक्तो यदि भवति शक्त प्रभवितुम्"**[iv]

तथैव "शिवकथामृतमहाकाव्ये" एतस्या:शक्ते: अपि आलोचना विहिता अस्ति। अत्र शक्तिपदेन पार्वत्या: ग्रहणं भवति। पुरुषपदेन शिवस्यापि ग्रहणंभवति। अत: शिवं विना शक्ति: अपूर्णा। शक्तिं विना शिव: अपूर्ण:।अत: शक्तिशिवयो: परस्परयो: मध्ये कश्चन परिपूरकसम्बन्ध: नितरां वर्तते। यश्च सम्बन्ध: प्रकृत्या सह पुरुषस्य, श्रुत्या सह स्मृते: विद्यते। स एव सम्बन्ध: पार्वतीशिवयो: विद्यते।

अत: राधां विना कृष्ण: अपूर्ण: कृष्णेन विना राधा अपूर्णा इति चैतन्यस्य अभिमतम्। तद्वत् पार्वतीं विना शिव: असम्पूर्ण:, शिवं विना पार्वतीअसम्पुर्णा। अत: द्वयोर्मध्ये यश्च सम्बन्ध: विद्यते स: च सम्बन्ध: अर्धनारीश्वरसम्बन्ध:, प्रकृतिजन्यसम्बन्ध:, लीलासम्बन्ध: इत्यपि वक्तुं शक्नुम: अत: उच्यते:–

**या शक्ति: पार्वती सा वै पुरुषस्तु शिव: स्मृत:।**

**प्रकृति: पुरुषश्चेतौ श्रुतिस्मृतिषु कीर्तितौ।।**[v]**(शि.क.म.-1.10)**

अस्मिन्नेव मायामोहजगति सर्वे जीवा: त्रयाणां जन्मनां फलं प्राप्नुवन्ति। तानि च जन्मानि तानि च कर्माणि प्रारब्धसञ्चितक्रियमाणानि भवन्ति। एतै: कर्मभि: सर्वे एव प्रपीडिता: सन्त: दु:खं प्राप्नुवन्ति। वस्तुत: तत्र तावन्न्यायशास्त्रे तर्कसङ्ग्रहे उच्यते:– **"प्रारब्धसञ्चितक्रियमाणानि कर्माणि नित्यं भुञ्जन्ति जना:"**[vi] किमर्थं इत्युक्ते तत्र कर्म एव प्रधानं भवति, यादृशं कर्म क्रियते तादृशं फलं प्राप्यते। अस्मात् उच्यते चाणक्यनीतौ – **"अवश्यमेव भोक्तव्यं कृतकर्मं शुभाशुभम्"**[vii]**(चा.नी.)**

तर्हि अस्मिन्नेव संसारे सर्वे त्रितापैः आध्यात्मिकः, आधिभौतिकः, आधिदैविकेः प्रपीडिताः दुःखंश्च प्राप्नुवन्ति। किमर्थं इत्युक्ते ते यथा पूर्वजन्मनि कर्मम् अकुर्वन् नाति कर्माणि सञ्चितानि भवन्ति। संचित कर्माणि एव वर्तमान काले जीवाः प्राप्नुवन्ति। किन्तु इदानीं यत् कर्मं क्रियते तत् कर्मणः फलं कदाचिद् त्रिषु दिवसेषु, एकसप्ताहे, षड्मासेसु, एकवर्षेषु, पञ्चवर्षेषु, दशवर्षेषु,द्वादशवर्षेषु च अवश्यं कर्मणः फलं प्राप्यते। अस्मात् उच्यते हितोपदेशे – " **त्रिभिवर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिदिनैः**

**अत्युत्कटैः पाप-पुरायैरिहैव फलमश्नुते"।।**[viii]**(हि.दे.मित्रलाभ-87)**

अतः चैतन्य सर्वदा सुकार्य कर्तुं देवकार्यं कर्तुं आध्यात्मिक कार्य विधातुं, भक्ति संबंधित कार्यं कर्तुं भक्तं प्रेरयति। तद्वारा मुक्तिः लभ्यते। तथा पापान्यपि क्षीयन्ते।

चैतन्य सदृशं विषय "शिवकथामृतमहाकाव्ये" छज्जुरामशास्त्रीमहोदयः अपि प्रारब्धकर्मणः विषयं समुधृत्य तत् विषये कथयति यत् कर्माणि त्रिविधानि भवन्ति। पूर्वजन्मकर्म, संचितकर्म, वर्तमानकर्म इति किन्तु एतेषां समेषां कर्मणां फलं नराः समयानुगुणम् अवश्यं प्राप्नुवन्ति।

महाप्रभुचैतन्यः स्वस्य दर्शने ब्रह्म ज्ञानं प्राप्ति विषये अकथयत् यत् यदि नवधा भक्तिं कुर्वन्ति कृष्णे मनः समर्पयन्ति कृष्णसम्बन्धितकर्म समाचरन्ति . कृष्णस्वरूपं सर्वान् जीवान् पश्यन्ति जीवेषु भेदं न परिकल्पयन्ति। समदृष्ट्या सर्वान् समाचरन्ति तदा जीवाः अवश्यं मुक्तिं प्राप्नुवन्ति। तत्र कोपि सन्देहः नास्ति। अपि च तैत्तरीतउपनिषदि उच्यतेः– **सत्यं वद धर्मं चर स्वाध्यायान्नप्रमदितव्यम्। भृत्यै न प्रमदितव्यम्।कुशलान्नप्रमदितव्यम्।यान्यनवद्यानि कर्माणि।तानि नोपसेवितव्यानि। यानि वद्यानि तानि सेवितव्याति। एषः आदेशः। एष उपदेशः।**[ix]**(तै.उ.)**

तर्हि एतादृशव्यवहारं यदि सर्वेषु जीवेषु व्यवहरन्ति तद्वारा अपि मुक्तिः जायते। तथैव असंन्मर्गात् संन्मार्गं यदि प्रवर्तिता भवेयुः तमसः यदि आलोकं प्रति गच्छेयुः मृत्युलोकात् अमृतलोकं साक्षात् एव प्राप्स्यन्ति। अस्मात् उच्यते बृहदारण्यकोपनिषदिः –

**ॐ असतो मा सद्गमय। तमसो मा ज्योतिर्गमय।**

**मृत्योर्माऽमृतङ्गमय ।।**[x]**(बृ.र.उ.)**

यदि एतान् सर्वान् आचरन्ति तर्हि साक्षात् एव मोक्ष प्राप्तिः सम्भविष्यति।।

तथैव "शिवकथामृतमहाकाव्ये" छज्जुरामशास्त्रीमहोदयःकथयति ब्रह्मज्ञानलाभाय अनेके मार्गाः वर्तन्ते।तेषु मार्गेषु विशिष्य सत्यकथनमेव उत्तममार्गः भवति। यदि कश्चन जीवः म्रीयमाणावस्थायां पतति तज्जीवस्य रक्षां साक्षादेव परमात्मा एवकरोति। तर्हि मुक्ति मार्गः प्रशस्तः भवति। अस्मादुच्यते – **ज्ञानादेव मुक्तिः**।यदि भवन्तः शिवस्य शैवविद्याम्, शिवतत्त्वम्,शिवस्वरूपम् . पशुपतिपाशान् एतान् त्रिविधोपायान् यदि अनुसरेयुः। तर्हि ब्रह्मप्राप्तिः सुकरेण सम्भविष्यति इति उच्यतेः–

**व्रह्मज्ञान ततो जन्तोर्म्रीयमाणस्य जायते।**

**ऋते ज्ञानेन मुक्तिर्वै सिद्धान्तः सर्वसम्मतः।।**[xi]**(शि.क.म.-1.45)**

महाप्रभुचैतन्यः स्वस्य अन्तिमजीवनं प्राणप्रियस्य जगन्नाथस्य कृष्णस्य धाम्नि पुर्यां यापयितुमिष्टवान्। किमर्थम् इत्युक्ते सः च चैतन्य अजानात् यत् – अस्मिन् संसारे कृष्णाद्विना अन्यः कोऽपि पदार्थः नास्ति। सः च पदार्थः चिरस्थायी, अनश्वरः भवति। तस्य पदार्थस्य नाशः भूतभविष्यवर्तमानेसु त्रिषु कालेषु कदापि नैव सम्भविष्यति। अस्मात्तस्य जगन्नाथकृष्णस्य पादपद्मयोः अन्तिमां लीलां यापयितुं मातुरनुमतिमिष्टवान्। माता च शचीदेवी पुत्रस्य मनसि एतादृशीं

व्याकुलतां ददर्श . मनसि आनन्दमनुभूतवती। तथान्तिमे पुर्यामन्तिम- कालं यापयितुं समादिष्टवती। किञ्च चैतन्य: यद्यपि न्यायशास्त्रे प्रवीण: आसीत् तन्मनसि वेदान्तशास्त्रंमध्येतुम् उत्कण्ठा आगता। अत: वेदान्तदर्शनम्अध्ययनार्थं स्वेच्छां प्रकटितवान्। किन्तु आगमनात् पूर्वं स: गङ्गानद्या: जलेन स्नानं कृत्वा शरीरं च पावयित्वा पुरीक्षेत्रं समागच्छत्।

तथैव छज्जूरामशास्त्रीमहोदय: कथयति ये ये शैवभक्ता: भवन्ति ते विशिष्य वाराणस्यां विद्यमानस्य विश्वनाथस्य देवस्य दर्शनं कर्तुम् अन्तिम -जीवनञ्च व्यतियापयितुमैच्छत्। तथा सुरनद्यां स्नानं कृत्वा शरीरं निष्कल्मसं कारयत्। तथा त्रिविधेभ्य: दुखेभ्य: मुक्तिमवाप्नोत्। श्रुतिस्मृतिपुराणनिगमादीनि शास्त्राणि अधीत्य संसारसागराद्विमुक्तिं प्राप्नोत्। तेषां सर्वेषां भक्तानां अन्तिमलक्ष्यं साधयितुं सर्वे साधका: .भक्ता: अत्र साधनां कर्तुं इच्छन्ति . आगच्छन्ति अपि च नैकानि साधनानि समादृत्य इह धाम त्यक्त्वा शिवधाम प्रति ( शिवलोकं) गच्छन्ति।

**असारे संसारे निखिल निगमाना च कृतिनाम्**

**मतान्येतानीह त्रिविधपरितापस्य शमने।**

**सदा काश्यां वास: सततसहवासश्च विदुषां,**

**सदा गङ्गा स्नानं सुतनु तव पूजा च मम च।।**[xii]**(शि.क.म.-1.47)**

**उपसंहार**: -यदि एवं रूपेण आलोचयाम: तर्हि ज्ञातुं शक्यते यत्- अस्मिन् शिवकथामृतमहाकाव्ये चैतन्यदर्शनस्य प्रभाव: नितरां दृश्यते। पदे पदे अत्र शिवेन सह कृष्णस्य सायुज्यं, पार्वत्या: सह राधाया: सायुज्यं, भक्त्या सह भक्तस्य सायुज्यं, शक्त्या सह शक्ते: सायुज्यं, श्रुत्या सह स्मृते: सायुज्यं, दुखेन सह सुखस्य सायुज्यं, कर्मणा सह पूर्वजन्मन: कर्मण: सायुज्यं, चिच्छक्त्या सह आह्लादिनीशक्त्या सायुज्यं एते सर्वे दार्शनिकतत्त्वविषया: अत्यन्तं सूक्ष्मेक्षिकतया वर्णिता: सन्ति। ये च विषया: चैतन्यदर्शनेन सह शिवकथामृतमहाकाव्यस्य सायुज्यतामाप्नुवान्ति। अत: महाकाव्ये चैतन्यदर्शनस्य विषया: अनेके सन्ति। ये च विषया: अध्ययनात् परं ज्ञातुं शक्यन्ते।

**संन्दर्भ ग्रन्थसूची**


1. विष्णुपुराणम्,गीताप्रेस,गोरखपुर ।

2. शिवकथामृतमहाकाव्यम् , मेहरचन्द लछमनदास प्रकाशक , दरियागंज , 110006 ।

4. आनन्दलहरी,चौखम्बा संस्कृत सीरीज अफिस,वाराणासी ।

6.तर्कसंग्रह:,भारतीय विद्या संस्थान,वाराणसी ।

8.हितोपदेश, चौखम्बा संस्कृत प्रतिष्ठान,38 यु.ए.बंगलो रोड,जवाहार नगर,दिल्ली-110007 ।

9.तैतरीयउपनिषद,गीताप्रेस,गोरखपुर ।

10.वृहदारण्यकउपनिषद गीताप्रेस,गोरखपुर ।


.